दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-116 | 1 | फरवरी 16, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणकृष्णचतुर्दशी
फाल्गुण 04 प्रविष्ठांशः मङ्गलमयः भवेत्

2 हिमाचलप्रदेशे दशम्यां कक्षायां द्विवारं परीक्षा दातुं शक्यते, अङ्कपत्रे श्रेष्ठाङ्काः एव गणिष्यन्ते
3 तकनीकीशिक्षामन्त्रिणा "राजेशधर्माणी" इत्यनेन सह सम्मिलितवन्तः हिमाचल- राजकीय- संस्कृत- शिक्षक-परिषदः सदस्याः
5 'विश्वमन'-संकल्पनायाः विषये अधिकं शोधं करणीयम् - प्रो. मधुसूदन-पेन्ना

## अप्रैलमासस्य द्वाविंशति-दिनाङ्के केदारनाथ- मन्दिरस्य द्वाराणि उद्घाटयिष्यन्ते



हिमसंस्कृतवार्ताः-उत्तराखण्डस्य रुद्रप्रयाग- मण्डले स्थितस्य एकादशतम- ज्योतिर्लिङ्गस्य केदारनाथ-मन्दिरस्य द्वाराणि (कपाटाः) अस्मिन् वर्षे अप्रैल-मासस्य द्वाविंशतिः (२२) दिनाङ्के भक्तेभ्यः उद्घाटयिष्यन्ते। गतदिवसे महाशिवरात्रेः पावन-अवसरे उखीमठ- स्थिते शीतकालीनकेन्द्रे ओङ्कारेश्वर-मन्दिर पञ्चाङ्ग- गणनायाः अनन्तरं एषा घोषणा कृता। अस्मिन् अवसरे बद्रीनाथ- केदारनाथ- मन्दिरसमित्याः अध्यक्षः हेमन्त द्विवेदी श्रद्धालुभ्यः शुभकामनाः प्रदत्तवान्, तान् 'चारधाम' यात्रायाः निमित्तं च निमन्त्रितवान्। सः अवदत् यत् तिथि-घोषणायाः अनन्तरं अधुना तीर्थयात्रायाः सिद्धतासु अधिकवेगाः आगमिष्यन्ति।

**मन्दिर-समित्या सूचितं यत्-**
•१९ दिनांके भगवतः केदारनाथस्य 'पञ्चमुखी डोली' उखीमठतः प्रस्थास्यते।
•२० दिनांके डोली गौरीकुण्डं प्राप्स्यति।
•२१ दिनांके डोली केदारनाथ-धामं प्राप्स्यति।
•२२ दिनांके च प्रातः अष्टवादने (८:०० AM) पारम्परिक-विधि-विधानैः सह मन्दिरस्य कपाटाः उद्घाटयिष्यन्ते।

## राज्य-प्रशासनं शिक्षकाणां विश्वासघातं करोतीति- शिक्षामन्त्री



केन्द्रीय-शिक्षा-मन्त्री धर्मेन्द्र-प्रधानः परह्यः कोलकता-नगरे शिक्षक-सम्मेलन-समये तृणमूल-काङ्ग्रेस् सर्वकारस्य उपरि कठोरा-क्रमणं कृतवान्, राज्य-प्रशासनं शिक्षकाणां विश्वासघातं करोतीति सः आरोपयन् टी. एम. सी. इत्यस्य शासनकाले शिक्षाक्षेत्रं सर्वाधिकतया बाधितम् अभवत् इत्यपि सः आरोपितवान्।

## महाशिवरात्रेः पावन- अवसरे राष्ट्रपति- उपराष्ट्रपति- प्रधानमन्त्री च देशवासिभ्यः शुभकामनाः अयच्छन्



हिमसंस्कृतवार्ताः- डॉ नरेन्द्रराणा सिरमौरः।राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी च महाशिवरात्रेः पावन- अवसरे देशवासिभ्यः शुभकामनाः व्याहृतवन्तः।राष्ट्रपतिः स्वसन्देशे कामनां कृतवती यत् भगवतः शिवस्य आशीर्वादाः सर्वेषु नागरिकेषु तिष्ठेयुः, भारतं च निरन्तरं प्रगतिपथे अग्रेसरं भवेत्। उपराष्ट्रपतिः सामाजिक- माध्यमेन (Social Media) अवदत् यत् काश्याः रामेश्वरम् पर्यन्तम् एतत् पावनपर्व देशस्य शाश्वत- अविच्छिन्न- आध्यात्मिकपरम्परायाः जीवन्तं प्रतीकम् अस्ति। राधाकृष्णन् महोदयेन उक्तं यत् महादेवस्य मातापार्वत्याः च अनुग्रहेण सर्वेषां जीवने सुखं, समृद्धिः, आरोग्यं च सिद्ध्येत्।प्रधानमन्त्रिणा नरेन्द्रमोदी-महोदयेनापि आशा प्रकटिता यत् भगवतः शिवस्य कृपया भारतं समृद्धेः उच्चतमं शिखरं प्राप्नुयात्।लोकसभाध्यक्षः ओम बिरला महाशिवरात्रिम् आस्थायाः, प्रायश्चित्तस्य, आत्मनिरीक्षणस्य च पर्व इति वर्णितवान्। सः अवदत् यत् एतत् पर्व भगवतः शिवस्य अपारकरुणायाः, त्यागस्य, संयमस्य, सङ्कल्पशक्तेः च स्मरणं कारयति। बिरला- महोदयेन प्रतिपादितं यत् शिवः प्रतिकूलपरिस्थितिषु अपि धैर्यधारणं शिक्षयति। महादेवस्य साहसम् अस्मान् विषम् अमृते परिवर्तयितुं सत्यमार्गे च निरन्तरं गन्तुं प्रेरयति। गृहमन्त्री अमित शाहः अपि सर्वेषां नागरिकाणां जीवने सुख-शान्ति-समृद्धये भगवतः शिवस्य आशिषः प्रार्थितवान्।

## लोकसभाध्यक्षः ओम बिरला बाङ्ग्लादेशस्य शपथग्रहणसमारोहे भारतस्य प्रतिनिधित्वं करिष्यति



हिमसंस्कृतवार्ताः- डॉ नरेन्द्रराणा सिरमौरः।लोकसभाध्यक्षः ओम बिरला अस्मिन् मासे सप्तदशदिनाङ्के (१७ फरवरी) ढाका-नगरे बाङ्ग्लादेश- राष्ट्रवादीदलस्य (BNP) अध्यक्षस्य तारिक रहमानस्य नेतृत्वे नवनिर्वाचित- बाङ्ग्लादेश- सर्वकारस्य शपथग्रहणसमारोहे भारतस्य प्रतिनिधित्वं करिष्यति। विदेशमन्त्रालयेन प्रसारिते विवरणे उक्तं यत् अस्मिन् महत्त्वपूर्णे कार्यक्रमे अध्यक्षस्य सहभागिता भारत-बाङ्ग्लादेशयोः जनानां मध्ये गभीरां दृढां च मैत्रीं सूचयति। मन्त्रालयेन प्रतिपादितं यत् एतत् द्वयोः देशयोः संयोजकानां लोकतान्त्रिकमूल्यानां प्रति भारतस्य दृढप्रतिबद्धतां पुष्टिं करोति। उभयोः इतिहास- संस्कृति- पारस्परिकसम्मानैः सम्बद्धौ प्रतिवेशिदेशौ इति कृते भारतेन तारिक-रहमानस्य नेतृत्वे बाङ्ग्लादेशस्य निर्वाचितसर्वकारस्य गठनस्य स्वागतं कृतम्। अपि च उक्तं यत् तारिक रहमानस्य दृष्टिकोणानां मूल्यानां च पक्षे जनतायाः प्रचण्डं जनादेशं प्राप्तम् अस्ति।

## सुभाषितम्

**यदा न कुरूते भावं, सर्वभूतेष्वमंगलम्।**
**समदृष्टेस्तदा पुंसः, सर्वा: सुखमया दिश:॥**

जो मनुष्य किसी के अमंगल का भाव नहीं रखता हो, सभी को समदृष्टि से देखने वाला हो उस पुरुष को सभी दिशाओं से सुख की प्राप्ति होती है। वह सर्वत्र सुख की अनुभूति करता है।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## आर्थिकविषयेषु मन्त्रि-मण्डलीय समितिः असम-राज्ये ब्रह्मपुत्र नद्याः अधः देशस्य प्रथम-जलान्तर्गामी-मार्गस्य रेल्-सुरङ्गेति-परियोजनायाः निर्माणाय अनुमोदनं दत्तवती

हिमसंस्कृतवार्ताः - असम-राज्ये ब्रह्मपुत्रनद्याः अधः निर्मितस्य देशस्य प्रथम-जलान्तर्गामि-द्विन-ट्यूब रोड-कम-रेल-टनल इति परियोजनायाः निर्माणाय केन्द्रेण सहायम् अनुमोदितम् । इयं पादोन-चतुस्त्रिंशत्प्रायः कि. मी. दीर्घः चतुष्पथ-अभिगम-नियन्त्रित-ग्रीन्फील्ड-सम्पर्केति परियोजनास्ति, यस्मिन् नद्याः अधः पादोन-षोडशाधिक कि. मी. दीर्घः द्विन-ट्यूब टनेल इति अन्तर्भवति, सा आर्थिककार्य-मंत्रिमंडलीय-समित्या अनुमोदिता अस्ति।

# बिलासपुरस्थे अखिल- भारतीय- आयुर्विज्ञान- संस्थाने कृत्रिमनेत्रेषु शल्यकर्म-अभ्यासं करिष्यन्ति चिकित्सकाः



हिमसंस्कृतवार्ताः- बिलासपुरम्।अखिल- भारतीय- आयुर्विज्ञान- संस्थानस्य बिलासपुरस्थिते नेत्र-विज्ञानविभागे चिकित्साप्रणाली अधिक- आधुनिकी भवितुम् आरभते। संस्थानप्रशासनेन चिकित्सालये अत्याधुनिक- वेट- लैब- स्थापनस्य निर्णयः कृतः। अस्याः प्रयोगशालायाः विशेषता एषा भविष्यति यत् अत्र चिकित्सकाः वास्तविक- रुग्णस्य नेत्रे शल्यकर्म करणात् पूर्वं 'रेटी-आई' सदृशेषु कृत्रिमनेत्रेषु दीर्घकालम् अभ्यासं करिष्यन्ति।

अनेन नूतन-उपक्रमेण न केवलं चिकित्सकानां कौशलं दृढं भविष्यति, अपि तु रुग्णानां दृष्टिः अपि अधिकं सुरक्षिता भविष्यति। अस्य परियोजनायाः कृते आवश्यक-अत्याधुनिक-उपकरणानां किट-सामग्रीणां च क्रयणार्थं निविदा-प्रक्रिया आरब्धा अस्ति। विभागीय-अधिकारीणां मतानुसारं एषा प्रयोगशाला नेत्र-विशेषज्ञ-रेजिडेण्ट-चिकित्सकानां प्रशिक्षण- भूमिरिव कार्यं करिष्यति। अत्र ते मोतियाबिन्दोः नेत्रपटलस्य (रेटिना) जटिल- शल्यक्रियायाः अभ्यासं यथार्थ-सदृशेषु नेत्र- आदर्शेषु कर्तुं शक्नुवन्ति।

नेत्रपटलं (रेटिना) शरीरस्य अत्यन्तं सूक्ष्मं संवेदनशीलं च अवयवम् अस्ति। 'रेटी-आई' आदर्शे स्थितासु सूक्ष्म-चित्रपट्टिकासु लेजर-अभ्यासेन चिकित्सकानां सूक्ष्मता शत-प्रतिशतपर्यन्तं वर्धिष्यते। तेन वास्तविक-शल्यक्रियाकाले दोषस्य संभावना शून्या भविष्यति। संस्थानं ये नूतन- शल्य-उपकरण- सङ्ग्रहान् तथा नेत्र-गोल-धारक-यन्त्राणि आनयति, तानि उच्च-श्रेणी-स्टेनलेस्-इस्पातेन निर्मितानि सन्ति। एतानि उच्च- तापमान- कीटाणुनाशन- प्रक्रियया (ऑटोक्लेव) शुद्धीकर्तुं शक्यन्ते, येन शल्यक्रियानन्तरं संसर्ग-रोगस्य जोखिमः न्यूनः भविष्यति। या सुविधाः पूर्वं केवलं चण्डीगढ-स्थिते पीजीआई-संस्थाने अथवा दिल्लीनगरस्य महत्सु चिकित्सालयेषु एव उपलब्धाः आसन्, ताः अधुना बिलासपुरे अपि प्राप्स्यन्ते। जटिल-मोतियाबिन्दः तथा नेत्र-पटल-भेदनादि-समस्याः अधुना अस्मिन् संस्थाने पूर्ण-सुरक्षया चिकित्सितुं शक्यन्ते।

## किमस्ति 'रेटी-आई' प्रौद्योगिकी तथा अन्यानि उपकरणानि?

एषा विशेषा चिकित्सकीय-किट अस्ति, यस्यां मानवनेत्रस्य अतीव यथार्थः आदर्शः निर्मितः अस्ति। अस्मिन् ६ मि.मी. परिमाणस्य पुपिला (नेत्र-केन्द्रबिन्दुः) परिवर्तनीयाः रेटिना-चित्रपट्टिकाः सन्ति। अतिरिक्तरूपेण नेत्र-स्थिरीकरण- शीर्षयन्त्रं, मोतियाबिन्द- शल्य-सेट चापि आनय्यन्ते। एतेषां उपकरणानां साहाय्येन चिकित्सकाः सूत्रस्थापनं, कृत्रिम-लेन्स-स्थापनं, रेटिना-लेजर-प्रक्रियायाः सूक्ष्मताः च अधिगन्तुं शक्नुवन्ति। विभागस्य लक्ष्यं अस्ति यत् मार्चमासस्य अन्त्यपर्यन्तं एषा प्रयोगशाला सम्यक्-रूपेण प्रवर्तिता भविष्यति।

# हिमाचलप्रदेशे दशम्यां कक्षायां द्विवारं परीक्षा दातुं शक्यते, अङ्कपत्रे श्रेष्ठाङ्काः एव गणिष्यन्ते



हिमसंस्कृतवार्ताः- धर्मशाला।हिमाचल प्रदेश विद्यालय-शिक्षा-बोर्डः, धर्मशाला अस्मिन् शैक्षणिकसत्रे विद्यार्थिनां हितार्थं महत्त्वपूर्णं परिवर्तनं कर्तुं प्रवृत्ता अस्ति। अधुना दशमी- कक्षायाः कृते "द्वि-परीक्षा-प्रणाली" (Dual Examination System) प्रवर्तिता भविष्यति। अस्याः अन्तर्गतं छात्राः एकस्मिन्नेव सत्रे द्विवारं परीक्षां दातुम् अवसरं प्राप्स्यन्ति। अङ्कपत्रे तयोः परीक्षयोः मध्ये यः अधिकतमः अङ्कः भविष्यति, स एव मान्यः भविष्यति।बोर्ड-अधिकारिणाम् अनुसारं प्रथमा मुख्य-परीक्षा मार्चमासे आयोजिता भविष्यति। ये परीक्षार्थिनः मार्च- परिणामेन असन्तुष्टाः स्युः अथवा केनचित् कारणेन अपेक्षितं प्रदर्शनं कर्तुं न शक्नुवन्ति, ते मई-जून-मासयोः द्वितीयपरीक्षायाम् उपवेशितुं विकल्पं प्राप्स्यन्ति। यदि द्वितीय-परीक्षायां न्यूनाङ्काः आगच्छेयुः तर्हि किम्? इति विषये बोर्डेन स्थितिः स्पष्टा कृता। उभयोः प्रयासयोः मध्ये यः अधिकः अङ्कः, स एव अन्तिमतया ग्राह्यः भविष्यति। यदि द्वितीय-परीक्षायां न्यूनाङ्काः स्युः, तर्हि प्रथमे प्राप्ताः अधिकाङ्काः एव अङ्कपत्रे अभिलिख्यन्ते।

**परिष्कारस्य अवसरः-**

अनेन व्यवस्थया पुनः परीक्षा-दाने किञ्चित् जोखिमं न भविष्यति। कदाचित् आरोग्य-समस्या, पारिवारिक- परिस्थितयः अथवा मानसिक-दबावः कारणेन छात्राः सम्यक् प्रदर्शनं कर्तुं न शक्नुवन्ति। द्वि-परीक्षा-प्रणाली तेषाम् आत्ममन्थनस्य तथा सुधारस्य अवसरं दास्यति।

**श्रेष्ठ-प्रदर्शने केन्द्रितता**

अस्याः नूतन-व्यवस्थायाः प्रभावेन छात्राणां आत्मविश्वासः वर्धिष्यते, राज्यस्य मेरिट-सूची अपि अधिक-प्रतिस्पर्धात्मिका पारदर्शिनी च भविष्यति, यतः अत्र छात्राणां श्रेष्ठ-प्रदर्शनमेव प्राधान्येन ग्राह्यं भविष्यति।

**- डॉ. (मेजर) विशाल शर्मा, सचिवः, विद्यालय-शिक्षा-बोर्डः, धर्मशाला।**




# Himachal News - स्वास्थ्य-संस्थानेषु सुविधानां कृते १६१७ कोटि-रूप्यकाणि अनुमोदितानि

हिमसंस्कृतवार्ताः- शिमला। प्रदेशव्यापि उत्तम-स्वास्थ्यसेवानां प्रदानेन उद्देश्येन राज्य-सर्वकारेण ३००० कोटि-रूप्यक-मूल्यकस्य स्वास्थ्य-आधुनिकीकरण-उपक्रमस्य प्रथम-चरणे १६१७ कोटि-रूप्यकाणि स्वीकृतानि। एषा योजना १ अप्रैल २०२६ तः ३० अप्रैल् २०३१ पर्यन्तं प्रवर्तिष्यते। अस्याः योजनायाः अन्तर्गतं स्वास्थ्य- संस्थानेषु अत्याधुनिक-निदानसुविधाः, सिमुलेशन- आधारित- वैद्यकीय-प्रशिक्षण- प्रणाल्यः, कृत्रिम- बुद्धिमत्ता- सक्षम-हस्तधार्य- क्ष- किरण-यन्त्राणि तथा एकीकृत-डिजिटल- स्वास्थ्य-मञ्चः उपलब्धाः करिष्यन्ते।प्रथमचरणे वैद्यकीयमहाविद्यालयेषु नूतन-भवन- निर्माणम्, जीर्णोद्धारः, शैक्षणिकखण्डानां तथा बाह्य-आन्तरिक-रोगी-सुविधानाम् उन्नयनं क्रियते। उच्चस्तरीय- सिमुलेशनकेन्द्राणि, ए. आर. वी. आर. आधारित-प्रशिक्षणसुविधाः, डिजिटल- पुस्तकालयाः, ई-लर्निंग-मञ्चैः सह एकीकृताः कौशलप्रयोगशालाः स्थाप्यन्ते।

द्वितीयचरणे आई. जी. एम. सी., ए. आई. एम. एस. एस. चमियाना, हमीरपुर- स्थित- वैद्यकीय-महाविद्यालये च चिकित्साकेन्द्राणां सुदृढीकरणं भविष्यति। वृक्क- प्रतिरोपणम्, अस्थिमज्जा-प्रतिरोपणम्, स्नायुतन्त्र- शल्यचिकित्सा, हृदय- वक्ष-शल्यचिकित्सा, उन्नत- एण्डोस्कोपिक- प्रक्रियाः, बाल-चिकित्सासेवाः, रोबोट- सहायित- शल्यक्रियाः इत्यादीनां विस्तारः क्रियते। ओ- आर्म- त्रि- आयामी-चित्रणप्रणाली, न्यूरो- नेविगेशनतन्त्रं, रोबोटिक-शल्यप्रणाली, एकीकृत- गम्भीर- परिचर्या-निगरानीतन्त्रेण संस्थानानि सुसज्जितानि भविष्यन्ति। उन्नत- शिशु- चिकित्सा- परिचर्या- नवाचार- केन्द्रम् अपि स्थाप्यते, यत् गम्भीर-शल्य-तथा दूरसंचार- सक्षम-शिशु- चिकित्सा- सेवानाम् एकीकरणं करिष्यति।तृतीयचरणे आदर्शस्वास्थ्यसंस्थानानि सुदृढीकृतानि भविष्यन्ति। तेषु सी. टी. स्कैनर, चल- क्ष-किरण-यन्त्राणि, अल्ट्रासोनोग्राफी- यन्त्राणि, लैप्रोस्कोपिकप्रणाल्यः, नेत्र- शल्य- एककाः च स्थापिताः भविष्यन्ति। टेलीमेडिसिन- सेवानां विस्तारः, डिजिटल-संदर्भ-जालस्य (रेफरल- नेटवर्क) विकासः क्रियते, येन जिला- चिकित्सालयाः तृतीयक- सुपर- विशेषज्ञकेन्द्रैः सह निर्बाधतया संयोज्यन्ते।मुख्यमन्त्री सुखविन्द्रसिंह-सुक्खू-महोदयेन उक्तं यत् स्वास्थ्य-संस्थानेषु अत्याधुनिक- चिकित्सा- उपकरण- संयोजनार्थं ३००० कोटि- रूप्यक- निवेशस्य योजना प्रवर्तते। स्वास्थ्य-विभागस्य विवरणानुसारं प्रतिवर्षं ९.५ लक्ष-रोगिणः उपचारार्थं हिमाचलप्रदेशात् बहिर्गच्छन्ति, यस्मात् राज्यस्य सकल-आर्थिक-उत्पादने (जीडीपी) प्रायः १३५० कोटि-रूप्यकाणाम् आर्थिक-हानिः भवति। एषा योजना प्रदेशे स्वास्थ्य-सेवानां गुणवत्तां संवर्धयित्वा जनसामान्याय सुलभं, आधुनिकं च चिकित्सोपचारं प्रदास्यति।

# तकनीकीशिक्षामन्त्रिणा "राजेशधर्माणी" इत्यनेन सह सम्मिलितवन्तः हिमाचल- राजकीय- संस्कृत- शिक्षक- परिषदः बिलासपुरजनपदस्य कार्यकारण्याः सदस्याः संस्कृतशिक्षकाश्च





**हिमसंस्कृतवार्ताः- शिवा शर्मा।** विगतदिने राजकीयसंस्कृतशिक्षकपरिषदः बिलासपुरजनपदस्य कार्यकारिण्याः संस्कृतशिक्षकाणां च समूहः जिलाध्यक्षस्य डॉ. अशोककुमारस्य अध्यक्षतायां घुमारवीं विधानसभायाः विधायकेन एवं हिमाचलप्रदेश-सर्वकारस्य तकनीकीशिक्षामन्त्रिणा "राजेशधर्माणी" इत्यनेन सह सम्मिलितवान् संस्कृतशिक्षकाणां च विविधविषयाणां विषये ज्ञापनपत्रं समर्पिवान्। तकनीकीशिक्षामन्त्रिणा संस्कृतशिक्षकाणां वार्ता सम्यक् श्रुता याचनापूर्तिं च कर्तुम् आश्वासनं प्रदत्तम्। अस्मिन्नवसरे परिषदः हमीरपुरविभागस्य विभागस्य सचिवः डॉ. जितेन्द्रकुमारः, बिलासपुरजनपदस्याध्यक्षः डॉ. अशोककुमारः, उपाध्यक्षः अनुजकुमारः, घुमारवीं-1 इति खण्डस्याध्यक्षः सुरेन्द्रशुक्ला, झण्डुताखण्डस्य अध्यक्षः मनोजकुमारः, अंकुश कुमारः, रजनीशः, विकासभाटिया, नरेशकुमारः, कृष्णचन्दः इत्यादयः संस्कृतशिक्षकाः समुपस्थिताः आसन्।

# काङ्गडा-जनपदे पर्यटनस्य संवर्धनाय पक्षा विस्तारिष्यन्ति, एशियाखण्डस्य दीर्घतमा जिपलाइन- परियोजना निर्मास्यते



हिमसंस्कृतवार्ताः कांगड़ा ।काङ्गडा- जनपदे पर्यटनविकासस्य उद्देशेन सुखविन्दर सिंह सुक्खु -महाभागस्य नेतृत्वे राज्यसर्वकारेण धौलाधार-उपत्यकायाः रमणीयप्रदेशे नड्डी-नाम्नि स्थले एशियाखण्डस्य दीर्घतमा जिपलाइन-परियोजना विकासयितुं निर्णयः कृतः। अस्याः ४.३ किलोमीटर-दीर्घायाः नड्डी- जिपलाइन-परियोजनायाः अनुमानितव्ययः ७.४१ कोटि-रूप्यकाणि सन्ति, सा च ऐतिहासिकी साहसिक-पर्यटन- उपक्रमरूपेण विकसितुं नियोजिता अस्ति।अस्यां परियोजनायां चत्वारः स्थापनबिन्दवः भविष्यन्ति- गल्लू (प्रारम्भिक-बिन्दुः), बलग्रामः, नड्डी, तथा मैगी-प्वाइण्ट-खड्ड (समापन-बिन्दुः)। एषा योजना पर्यटकेभ्यः रोमाञ्चकानुभवं प्रदास्यति, सह धौलाधार-पर्वतमालायाः मनोहर- प्राकृतिक-सौन्दर्यस्य आस्वादनस्य अवसरं दास्यति। एषा परियोजना ३६ मासानाम् अवधौ समापयितुं प्रस्ताविता अस्ति। एषा जिपलाइन-व्यवस्था धर्मशालानगरस्य नड्डी- व्यू- प्वाइण्ट-प्रदेशे स्थापिता भविष्यति, यः स्वस्य विहङ्गम-दृश्यैः प्रसिद्धः अस्ति। परियोजनायाः पूर्णतया अनन्तरं अस्मिन् प्रदेशे पर्यटन-अवसंरचनायाः सुदृढीकरणं भविष्यति, साहसिक-पर्यटनरुचिं वहन्तः पर्यटकाः आकर्षिताः भविष्यन्ति, नूतन-रोजगार- अवसराः सृज्यन्ते, क्षेत्रस्य समग्र- आर्थिक-विकासश्च प्रवर्धिष्यते।मुख्यमन्त्रिणा उक्तं यत् राज्यसर्वकारेण काङ्गडा- जनपदाय 'पर्यटन-राजधानी' इति मानद-उपाधिः प्रदत्ता अस्ति, जनपदे पर्यटन- अवसंरचनायाः सुदृढीकरणाय सततपर्यटनविकासस्य प्रोत्साहनाय च बहवः उपक्रमाः प्रवर्तिताः सन्ति।

# HP News - राज्यस्य पंचायतानां कृते ६८.६५ कोटि-रूप्यकाणां विनियोगः

**हिमसंस्कृतवार्ताः- शिमला।**
पञ्चदश- वित्तायोगस्य अन्तर्गतं राज्यस्य पंचायती-राज- विभागाय अनटाइड-निधेः द्वितीयं अन्तिमं च राशिभागं ६८.६५कोटि-रूप्यकाणि प्राप्तानि। टाइड-निधेः अन्तर्गतं १०२ कोटि- रूप्यकाणां द्वितीयांशम् अद्यापि आगन्तव्यम् अस्ति।
अतः प्राप्ता एषा अनटाइड-निधेः राशिः पंचायतानां निर्वाचित-प्रतिनिधीनां पदच्युत्यनन्तरम् अपि प्रशासकैः पूर्व-प्रस्तावित-योजनासु व्ययितुं शक्यते। अनेन पंचायतस्तरे विकासकार्याणां गतिः वर्धिष्यते, स्थगित-कार्याणि च पूर्णानि भविष्यन्ति।

### अनटाइड-निधेः व्यय-क्षेत्राणि

स्थानीय-निकायानां प्राप्तराशौ- टाइडनिधिः स्वच्छता, पेयजल-व्यवस्था इत्यादिषु निर्दिष्टकार्येषु एव व्ययितव्यं भविष्यति। अनटाइडनिधिः पंचायत-विकास-कार्येषु, यथा पदमार्ग-निर्माणेषु, ग्राम- स्तरीय- आधारभूत-सुविधासु अन्ये विकास-उपक्रमेषु च उपयुज्यते।

### ३५२२ पंचायतेषु प्रशासकाः नियुक्ताः

राज्ये केलाङ्गक्षेत्रस्य ३२, पाङ्गीक्षेत्रस्य १९, कुल्लूक्षेत्रस्य च ४ पंचायतेषु निर्वाचित-प्रतिनिधीनां कार्यकालः अद्यापि अवशिष्टः अस्ति, ते एव कार्यभारं वहन्ति। अन्येषु ३५२२ पंचायतेषु खण्ड-विकास- अधिकारिणः (BDO) अध्यक्षतायां प्रशासकीयसमितयः सङ्घटिताः। पंचायत-समितिषु जिला-परिषदत्सु च मुख्य-कार्यकारी-अधिकारिणां अध्यक्षतायां प्रशासकीय-समितिभ्यः उत्तरदायित्वं समर्पितम्। एतासां समितीनां वित्तीय-अधिकाराः प्रदत्ताः सन्ति, येन पूर्व-स्वीकृत-योजनासु निधेः विनियोगः कर्तुं शक्यते। अनेन विनियोगेन ग्राम-विकासकार्येषु त्वरिता प्रगतिः अपेक्ष्यते।

# HP Vidhan Sabha Budget Session - विधानसभा-सत्राय सुदृढाः सुरक्षा-व्यवस्थाः। ८७२ पुलिस-कर्मचारिणः नियुक्ताः




**हिमसंस्कृतवार्ताः- शिमला।** विधानसभासत्रस्य अवसरे पुलिस-विभागेन सुदृढाः सुरक्षाव्यवस्थाः कृताः। विधानसभापरिसरेण सह नगरस्य प्रवेशद्वारेषु अपि सतर्कता वर्धिता अस्ति। तवी-मोड, शोघी इत्यादिषु स्थानेषु पुलिस-बलस्य नियुक्तिः कृता। संभावित-धरनाप्रदर्शन- रैली- आदीनां दृष्ट्या विधानसभापरिसरः तस्य समीपवर्तीक्षेत्रं च चतुर्षु सेक्टर-भागेषु विभक्तम् अस्ति। प्रत्येकक्षेत्रे राजपत्रित- पुलिस- अधिकारिणः प्रभारीरूपेण नियुक्ताः। सत्रकाले १५ राजपत्रित-अधिकारिणः, ३० अराजपत्रित- अधिकारिणः, ६६ मुख्य- आरक्षिणः, ३७५ आरक्षिणः, ४७ महिला-आरक्षिणः, १६ संचार- कर्मचारिणः नियुक्ताः सन्ति। २०० होमगार्ड- आरक्षकाः, क्विक-रिएक्शन-टीम, विशेष- सुरक्षा- एककम् अन्येषां विशेषदलानां ७५ प्रशिक्षित- कमाण्डो अपि विविधेषु स्थानेषु नियोजिताः भविष्यन्ति। समग्रतया ८७२ अधिकारी- कर्मचारिणः नगरस्य समीपवर्ती- प्रदेशेषु नियुक्ताः सन्ति।
पुलिसविभागस्य विशेषशाखा, राज्य- अन्वेषण-विभागस्य कर्मचारिणः अपि सामान्य-वेषेण नियोजिताः भविष्यन्ति। सुरक्षा-सुदृढीकरणार्थं सीसीटीवी-कैमरा-प्रणाली, डिजिटल- वीडियोग्राफी, फोटोग्राफी तथा ड्रोन- निरीक्षण- व्यवस्था अपि उपयुज्यते। वरिष्ठ-पुलिस-अधीक्षकः शिमला गौरवसिंहमहोदयः जनान् प्रति आह्वानं कृतवान् यत् सुरक्षा-निरीक्षणे सहयोगं कुर्वन्तु, मिथ्याभ्रान्तिः न विश्वसन्तु, संशयास्पद-गतिविधीनां विषये शीघ्रं पुलिस-विभागं सूचयन्तु।

**यातायात-व्यवस्थायाः सुदृढीकरणम्**

नगरस्य यातायात-व्यवस्थां सुव्यवस्थितां कर्तुं एकस्य राजपत्रित-अधिकारिणः निरीक्षणे ट्रैफिक- पुलिसस्य अतिरिक्त-५० पुलिस-आरक्षकाः तथा ३० होमगार्ड-कर्मचारिणः नियुक्ताः। सोमवासरात् आरभ्य अतिरिक्त-बलस्य नियुक्त्या जनानां पीक- ऑवर्स- कालेषु उत्पद्यमान- यातायात- सम्मर्द- समस्यायाः शमनस्य अपेक्षा व्यक्ता अस्ति।
एवं विधानसभासत्रं निर्विघ्नतया सम्पन्नं भवेत् इति प्रशासनस्य प्रमुखो लक्ष्यः अस्ति।

# राष्ट्रसेवायाम् ठाकुररामसिंहमहोदयस्य योगदानं श्लाघनीयम्- जेपी नड्डा

## हमीरपुरे ठाकुररामसिंहमहोदयस्य जयन्त्यां एकस्मिन् मञ्चे आगतौ जे. पी. नड्डा प्रेमकुमारधूमलश्च






हिमसंस्कृतवार्ताः- (डॉ मनोजशैलः) हमीरपुरम्। हमीरपुरजनपदस्य 'ठाकुररामसिंहइतिहास-शोधसंस्थानम् नेरी' इत्यत्र ठाकुररामसिंहमहोदयस्य १११ तमः जयन्ती-समारोहः आयोजितः। अस्मिन् उपलक्ष्ये मुख्यतिथिरूपेण केन्द्रीयस्वास्थ्यमन्त्री जगतप्रकाशनड्डा उपस्थितः आसीत्। तत्रैव पूर्वमुख्यमन्त्री प्रो. प्रेमकुमारधूमलः विशिष्टातिथिरूपेण उपस्थितः आसीत्। उभौ नेतृवरौ दीर्घकालानन्तरं एकस्मिन् मञ्चे दृश्येते स्म। कार्यक्रमे राष्ट्रियस्वयंसेवकसङ्घस्य अखिलभारतीय-कार्यकारिणीसदस्यः सुरेश सोनी मुख्यवक्ता आसीत्।अखिलभारतीय- इतिहास- संकलन-योजनायाः अध्यक्षः प्रो. ईश्वरशरणः विश्वकर्मा कार्यक्रमस्य अध्यक्षः आसीत्। डॉ. राजेन्द्र प्रसाद-केन्द्रीय- विश्वविद्यालयः (पूसा, बिहार) इत्यस्य कुलाधिपतिः डॉ. प्रेमलालगौतमः, शोधसंस्थानस्य अध्यक्षः प्रो. भागचन्दः चौहानः, निदेशकः सङ्गठनसचिवश्च डॉ. चेतराम गर्गः मञ्चासीनाः आसन्। कार्यक्रमात् पूर्वं ठाकुररामसिंह महोदयस्य प्रतिमायाः अनावरणम्, शोधसंस्थानस्य कार्याणां डिजिटलीकरणम् (Digitization) संस्थानस्य प्रदशर्न्याः अवलोकनं चापि कृतम्।

### अग्रिम-संततिभ्यः सदैव प्रेरणा

केन्द्रीयस्वास्थ्यमन्त्री जगतप्रकाशनड्डा ठाकुररामसिंहमहोदयं स्मरन् अवदत् यत् अद्य वयं तादृशस्य महानुभावस्य जयन्तीं मानयामः यः अग्रिम-संततिभ्यः सदैव प्रेरणां दास्यति। वयं सर्वे जानीमः यत् भारतस्य विंशति-शताब्दी कीदृशी आसीत्, तासु परिस्थितिषु १९४१ तमे वर्षे एकः युवा राष्ट्रियस्वयंसेवकसङ्घस्य सम्पर्कम् आगत्य स्वकीयं सम्पूर्णं जीवनं राष्ट्रसेवायै समर्पितवान्। अष्टाशीति (८८) वर्षस्य वयसि इतिहास- संकलन- सदृशं नूतनं प्रकल्पं प्रारभ्य तत् पूर्णं कर्तुं ठाकुररामसिंहमहोदयस्य दृढेच्छाशक्तिं सङ्घटनकौशलं च दर्शयति।

#### लोकपरम्पराभ्यः नूतनः परिचयः प्रदत्तः- सुरेशसोनी

मुख्यवक्ता सुरेशः सोनी अवदत् यत् वयं तादृशस्य इतिहासकारस्य १११ तमं जन्मदिवसं स्मर्तुं एकत्रिताः स्मः येन स्वलेखनेन न केवलं हिमाचलस्य सांस्कृतिकचेतनायै स्वरः दत्तः, अपि तु इतिहास-लोकपरम्पराभ्यः नूतनः परिचयः अपि प्रदत्तः। "तूष्णीम् आगच्छ, योगदानं देहि, अग्रे गच्छ" इति भारतस्य या परम्परा वर्तते, रामसिंहमहोदयः तस्याः परम्परायाः संवाहकः आसीत्।

#### इतिहासार्थं समर्पितं जीवनम्- विश्वकर्मा

प्रो. ईश्वरशरणः विश्वकर्मा अवदत् यत् ठाकुर रामसिंहमहोदयः अस्माकं मनस्वी आसीत्। १९९४ तः १९९६ पर्यन्तं इतिहास-संकलनस्य त्रीणि बृहद्-अधिवेशनानि तस्य नेतृत्वे अभवन्। 'विकसित भारतम् २०४७' इत्यस्य लक्ष्यप्राप्तौ इतिहासकाराणां महत्त्वपूर्णा भूमिका अस्ति, यतः प्रमाणिकेतिहासं विना भारतस्य आत्मा पूर्णरूपेण विकसिता न भविष्यति।

### रामसिंहमहोदयेन इतिहासाय नूतना दिशा प्रदत्ता- धूमलः

विशिष्टातिथिः प्रो. प्रेमकुमारधूमलः अवदत् यत् ठाकुररामसिंहमहोदयस्य व्यक्तित्वं महान् आसीत्। अष्टाशीति (८८) वर्षस्य वयसि शोधसंस्थानस्य स्थापनायाः यः सङ्कल्पः तेन कृतः, सः अद्य फलवान् जातः। सः उक्तवान् यत् रामसिंहमहोदयस्य जीवनम् अस्माकं कृते एकः प्रकाशस्तम्भः अस्ति, यः अस्मान् स्वसंस्कृत्या इतिहासैः मूल्यैश्च सह संलग्नान् स्थातुं प्रेरयति।

### ग्रन्थानां विमोचनम्

अस्मिन् अवसरे संस्थानेन प्रकाशितायाः 'स्मारिका वार्षिकप्रतिवेदनम् (2025-26)' इत्यस्याः तथा पञ्चानां पुस्तकानां च विमोचनं कृतम्-

१. 'ऋग्वेद में पश्चिमी हिमालय के संदर्भ' (सम्पादकः- डॉ. ओम दत्त सरोचः, डॉ. अमित शर्मा, शशि शर्मा)
२. 'हिमाचल प्रदेश की सांस्कृतिक विरासत' (सम्पादकः बारूरामठाकुरः, मिहिर बोराना)
३. 'हिमाचल प्रदेश के गांव' (सम्पादकः: डॉ. राकेश कुमार शर्मा, ऋषिकुमारः)
४. 'लेखक डॉ. बिन्दू साहनी' (सम्पादकः-राजेन्द्रकुमारः, बिन्दू साहनी)

कार्यक्रमस्य अन्ते प्रो. भाग चन्द चौहानः सर्वेषां धन्यवादं कृतवान्।




✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# महाशिवरात्रिपर्व

**फाल्गुने कृष्णपक्षस्य या तिथिः स्याच्चतुर्दशी।**
**तस्यां या तामसी रात्रिः सोच्यते शिवरात्रिका।।**

फाल्गुनकृष्णपक्षस्य चतुर्दशी तिथिः महाशिवरात्रिपर्वत्वेन ज्ञायते, पाल्यते च, हिन्दूसनातनिभिः अस्माभिः। शिवरात्रिः इत्युक्ते सा रात्रिः, या शिवतत्त्वेन सह पूर्णतः सम्बन्धिता वर्तते। भगवतः शिवस्य प्रियतमा रात्रिर्हि शिवरात्रिरिति। शिवार्चनम्, अभिषेकः, उपवासः, जागरणं चेति अस्य पर्वणो विशेषता। ईशान-संहितानुसारम् अस्यां रात्रौ आदिदेवो भगवान् श्रीशिवः कोटिशः सूर्यसमः प्रभावशाली भूत्वा लिङ्गरूपेण प्रकट्यभवत्। लिङ्गमित्युक्ते शिवस्य प्रतीकं, यच्च सत्यं शिवं सुन्दररूपमस्ति। महाशिवरात्रिपर्व परमात्मनः शिवस्य दिव्यावतरणस्य मङ्गलसूचकमस्ति। तस्य भगवतो निराकारतः साकाररूपेण अवतरणस्य या रात्रिः, सा महाशिवरात्रिः कथ्यते। भगवान् शिवः- कामः, क्रोधः, लोभः, मोहः, मत्सरः इत्यादिविकारेभ्यः भक्तान् विमुच्य, तेभ्यः परमसुखशान्त्यैश्वर्यादिकं प्रददाति। अन्येषां देवानां पूजनं दिवाकाले विधीयते, परं शिवस्य कृते रात्रिर्हि प्रिया किमर्थमिति जिज्ञासा उद्भवति। वस्तुतो भगवान् शङ्करः संहारशक्तेः, तमोगुणस्य च अधिष्ठाता वर्तते, तस्मात् तमोमयीं रात्रिं प्रति तस्य आकर्षणं स्वाभाविकम् एव। रात्रिः संहारकालस्य प्रतिनिधिरूपा, अस्याः आगमनान्तरं हि प्रथमतः प्रकाशस्य संहारः, द्वितीयतो जीवानां दैनिक- कर्मचेष्टानां संहारः, एवम् अन्ते निद्राद्वारा सञ्चेतनतायाः हि संहारः। एवं सम्पूर्णं विश्वं हि संहारिण्याः रात्रेः अङ्के अचेतनतां गत्वा निपतति, शेते वा। एतादृश्यां स्थितौ, प्राकृतिकदृष्ट्या शिवस्य रात्रिप्रियता सहजा एव। परन्तु न केवलं रात्रौ एव, अपितु शिवाराधना नित्यप्रातो, दिवा वा सर्वकाले विधातुं शक्या। अत एव महाशिवरात्रिरियं सर्वैः सनातनिभिः महोत्सवरूपेण प्रतिवर्षं स्वकल्याणाय, जनमङ्गलाय च सश्रद्धं पालनीया इति, शुभम्।

# नूतन-डिजिटल-टोकन इत्याधारित-वितरण-व्यवस्था सार्वजनिक-वितरण-व्यवस्थायाः अन्तः भ्रष्टाचारं निवारयिष्यति,

कृषकाणां, पशुपालकानां, मत्स्यकारिणां च हितं सर्वेषु अन्ताराष्ट्रिय-व्यापारसमन्वयेषु रक्षितं भवेदिति सुनिश्चितं कृत्वा कृषि-समुदायं प्रति नरेन्द्र-नरेन्द्रमोदी-सर्वकारस्य प्रतिबद्धतां केन्द्रीय-गृह-मन्त्री अमितशाहः पुनः दृढीकृतवान्। गुजरातस्य गान्धीनगरस्य महात्मा मन्दिरे देशस्य प्रथम-केन्द्रीय-बैङ्क-डिजिटल्-मुद्रा इत्याधारितायाः सार्वजनिक-वितरण-व्यवस्थायाः उद्घाटना-नन्तरं मन्त्री सम्बोधयन् आसीत्।मन्त्रिणा विश्वासः प्रकटितः यत् नूतन-डिजिटल-टोकन इत्याधारित-वितरण-व्यवस्था सार्वजनिक-वितरण-व्यवस्थायाः अन्तः भ्रष्टाचारं निवारयिष्यति, वितरण-प्रक्रिया-याञ्च आवश्यकं पारदर्शितां आनयति। एतैः प्रयत्नैः सप्तविंशतिः कोटिजनाः सफलतया दारिद्र्य रेखाम् अतिक्रमितवन्तः इति सूचयन्, श्री शाहः विगतदशके सर्वकारस्य दरिद्र-समर्थक-उपक्रमानपि अधोरेखितवान्।

# ‘विश्वमन’-संकल्पनायाः विषये अधिकं शोधं करणीयम् - प्रो. मधुसूदन-पेन्ना

## भारतीय-मनोविज्ञाने ‘मनसः’ अवधारणाम् आधुनिक-परिभाषया स्पष्टीकर्तुं आवश्यकता - डॉ. अतुल-वैद्य




**हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे, नागपुरम्।** कविकुलगुरुकालिदास-संस्कृत-विश्वविद्यालयस्य संस्कृत-भाषा-साहित्य-विभागेन ‘भारतीय-मनोविज्ञानम्’ इति विषये एकदिवसीया राष्ट्रीय-संगोष्ठी रामटेके सम्पन्ना। अस्याः संगोष्ठ्याः कृते केन्द्रीयसंस्कृतविश्वविद्यालयतः आर्थिक-अनुदानं प्राप्तम्।संगोष्ठ्याः उद्घाटन-कार्यक्रमस्य अध्यक्षतां माननीय-कुलपतिः डॉ. अतुल-वैद्य कृतवान्। प्रमुख-अतिथिरूपेण प्रख्यातः संस्कृत-विद्वान् महाकविश्च प्रो. मधुसूदन-पेन्ना, संचालकः संस्कृत-अकादमी-हैदराबादः उपस्थितः आसीत्। सारस्वत-अतिथिरूपेण डॉ. दिनेश-रसालः, प्राध्यापकः संस्कृत-प्राकृत-विभागे सावित्रीबाई फुले पुणे विश्वविद्यालयः विशेष-अतिथिरूपेण वेदविद्या-संकायस्य अधिष्ठाता प्रो. हरेकृष्ण-अगस्ती उपस्थिताः आसन्। कुलसचिवः डॉ. रोशन-अलोने अपि मंचे विराजमानः आसीत्। संगोष्ठ्याः संयोजिका प्रो. कविता-होले तथा समन्वयकः प्रो. पराग-जोशी विशेषतया उपस्थितौ।कार्यक्रमः दीप-प्रज्ज्वलनेन आरब्धः। प्रास्ताविकं समन्वयकः प्रो. पराग-जोशी अकरोत्। संयोजिका प्रो. कविता-होले उक्तवती यत् अस्याः संगोष्ठ्याः मंथनात् शोधार्थिनां भारतीय-मनोविज्ञानस्य नूतनाः विचाराः संकल्पनाश्च स्पष्टाः भविष्यन्ति, नूतन-शोध-विषयाश्च प्राप्स्यन्ते।

### अन्तःकरण-चतुष्टये मनः सर्वासां मानसिक-वृत्तीनां केन्द्रम्

प्रमुख-अतिथिः प्रो. मधुसूदन-पेन्ना स्व-बीज-भाषणे भारतीय-मनोविज्ञानस्य गम्भीरं विश्लेषणं प्रस्तुतवान्। तेन भारतीय-पाश्चात्य-दर्शनयोः दृष्ट्या ‘मनसः’ संकल्पना स्पष्टीकृता। तेनोक्तं यत् भारतदेशे मनसः अत्यन्तं सूक्ष्मं विश्लेषणं कृतम्, अन्तःकरण-चतुष्टये मनः सर्वासां मानसिक-वृत्तीनां केन्द्रम् अस्ति। वेद-उपनिषद्-योगदर्शनेषु मनसः साक्षीभावः, अभिव्यक्तिः, अनुभूतिः, चिन्तनं च विवृता, तस्य नियन्त्रणोपायाश्च निरूपिताः। मनः स्वभावतः चञ्चलं भवति, तस्य नियन्त्रणस्य उपायाः पतञ्जलि-मुनिना निर्दिष्टाः। मनोनिग्रहस्य अर्थः उचित-अनुचित-विवेकः इति। ‘तर्क’ तथा ‘सत्तर्क’ इत्येतयोः भेदं स्पष्टीकृत्य तेनोक्तं यत् मनोनिग्रहः निरन्तराभ्यासेन एव सिद्ध्यति। ‘विश्वमन’-संकल्पनायाः विषये अधिक-शोधस्य आवश्यकता वर्तते। नव-शोधकर्तृभिः मूल-संस्कृत-ग्रन्थानामध्ययनं कृत्वैव शोधः करणीयः, अन्यथा वैचारिक-विभ्रमः सिद्धान्त-विरोधश्च सम्भवति इति तेन प्रतिपादितम्।अध्यक्षीय-भाषणे कुलपतिः डॉ. अतुल-वैद्य अवदत् यत् भारतीय-दर्शने मनसः विचारः अतीव प्रगल्भः वैज्ञानिकश्च अस्ति। अद्य तस्य आधुनिक-वैज्ञानिक-भाषया परिभाषया च प्रस्तुतीकरणस्य आवश्यकता वर्तते, येन सामान्य-जनाः अपि तत् सुबोधं कर्तुं शक्नुयुः। सूक्ष्म-जीवात् आरभ्य मनुष्य-पर्यन्तं जीवन-प्रेरणा मनसः एव जायते। यदा आवश्यकं भवति तदा मनः विषयेन सह संयोजयितुं, अनावश्यकतायां तस्मात् पृथक्कर्तुं च शक्यते—एवमेव मानसिक-सुदृढतायाः लक्षणम् इति।

उद्घाटनानन्तरं विशेष-परिसंवादः आयोजितः। डॉ. दिनेश-रसालः सन्त-साहित्ये भारतीय-मनोविज्ञानस्य विषये विचारान् प्रस्तुतवान्। डॉ. अमृता-भुस्कुटे (बिंझाणी-महिला-महाविद्यालयात्) भारतीय-मानसिक-स्वास्थ्याय पञ्चकोश-पुरुषार्थ-प्रारूपयोः विषये मन्तव्यम् अकरोत्। परिसंवादस्य अध्यक्षतां प्रो. कलापिनी-अगस्ती कृतवती।विविध-सत्रेषु समग्रतया ७५ शोधार्थिभिः शोधपत्राणि प्रस्तुतानि। कार्यक्रमस्य सञ्चालनं डॉ. श्वेता-शर्मा अकरोत्।समापन-कार्यक्रमः प्रो. कविता-होले-अध्यक्षतायां सम्पन्नः। समापन-सत्रे विशेष-अतिथिरूपेण विश्वविद्यालय-योजना-विकास-मण्डलस्य निदेशकः प्रो. प्रसाद-गोखले तथा परिसर-निदेशकः प्रो. हरेकृष्ण-अगस्ती उपस्थितौ।प्रस्तुतानां ७५ शोधपत्राणां मध्ये सिमरन-ठाकुर, प्राजक्ता-पेंदाम, अनघा-निल्दावार, गणेश-नाईकवाडे तथा मनीषा-कदम इत्येते उत्कृष्ट-शोधपत्र-प्रस्तुतीकरणार्थं प्रमाणपत्रैः, स्मृति-चिह्नैः, नगद-पुरस्कारैश्च सम्मानिताः।सह-समन्वयिका डॉ. श्वेता-शर्मा संगोष्ठ्याः प्रतिवेदनं प्रस्तुतवती, समन्वयकः प्रो. पराग-जोशी धन्यवाद-ज्ञापनं कृतवान्। राष्ट्रगानेन सह कार्यक्रमस्य समापनम् अभवत्।

# अर्बन-चैलेञ्ज इति कोषस्य अनुमोदनम्, उच्च-गुणवत्तायुक्तानि, नगरीय-मूलसौकर्याणि दास्यति, नगराणि च देशस्य आर्थिकवृद्धेः प्रमुखानि चालकानि भविष्यन्ति



**हिमसंस्कृतवार्ताः** - केन्द्रीयमन्त्रिमण्डलेन एकलक्षकोटिरूप्यकाणाम् अर्बन चैलेञ्ज फण्ड इत्यस्य अनुमोदनं कृतेति वार्तायाः प्रशंसाम् अकरोत्। सामाजिक-प्रसार-माध्यमे श्रीमोदी अवदत् यत्, उच्च-गुणवत्तायुत-नगरीय-मूलसौकर्य-प्रदानाय कोषः विपण्य-वित्तस्य, निज-सहभागित्वस्य, नागरिक-केन्द्रित परिष्काराणाञ्च लाभं प्राप्स्यति । सः अवदत् यत् अयम् उपक्रमः नगराणि देशस्य आर्थिकवृद्धेः प्रमुखानि चालकानि करिष्यति। अर्बन चैलेञ्ज-फण्ड इति गृह-नागर-कार्य-मन्त्रालयस्य केन्द्र-प्रायोजित योजना अस्ति, यस्याम् आहत्य-केन्द्रीय-साहाय्यं एकलक्ष-कोटि-रूप्यकाणि अस्ति। अस्य कोषस्य उद्देश्यं स्थिति-स्थापकानां, उत्पादकानां, सर्वसमावेशकानां, जलवायु-प्रतिक्रियाशीलानाञ्च नगराणां निर्माणम् अस्ति, येन ते देशस्य आर्थिकवृद्धेः अग्रिम चरणस्य प्रमुख-चालक-रूपेण स्थिताः भविष्यन्ति। अस्मात् चलायमान - वित्तवर्षात् त्रिंशत्-एदेकत्रिंशत् वित्तवर्ष-पर्यन्ततः, त्रिंशत्-त्रयस्त्रिंशत्पर्यन्तं विस्तृता कार्यान्वयन-अवधिः अस्ति।

# टी२० विश्वचषके भारतेन पाकिस्तानदलं ६१ धावनाङ्कैः पराजितम्




कोलम्बो-नगरे आयोजितस्य आईसीसी पुरुष टी२० विश्वचषस्य स्पर्धायां भारतेन पाकिस्तानदलं ६१ धावनाङ्कैः पराजितम्। भारतेन प्रथमं कन्दुकताडनं (Batting) कृत्वा पाकिस्तानदलाय १७६ धावनाङ्कानां लक्ष्यं दत्तम्। प्रत्युत्तरे पाकिस्तानदलं केवलं ११४ धावनाङ्केषु एव पतनम् (all out) जातम्।
जसप्रीत-बुमराह-अक्षरपटेल-हार्दिकपाण्ड्या महोदयाः द्वौ-द्वौ विकेट-कन्दुकपातः (wickets) प्राप्तवन्तः। भारतस्य पक्षतः इशान-किशनः सर्वाधिकं ७७ धावनाङ्कान् अर्जितवान्। तिलकवर्मा २५ धावनाङ्कान् तथा च सूर्य कुमार यादवः ३२ धावनाङ्कान् रचितवन्तः।
लक्ष्यस्य अनुसरणं कुर्वतः पाकिस्तानदलस्य आरम्भः अतीव कष्टकरः आसीत्। हार्दिकपाण्ड्या प्रथमस्मिन् एव ‘चक्रे’ पाकिस्तानस्य प्रथमक्रमाङ्कस्य-कन्दुकताडकं साहिबजदा-फरहानं शून्य-धावनाङ्के बहिः (out) कृतवान्। जसप्रीत-बुमराहः द्वितीये ‘चक्रे’ द्वौ स्तोभौ-ग्रहणेन भारतस्य स्थितिं दृढां अकरोत्।
पूर्वम्, प्रथमं ताडनं कुर्वन् भारतदलेन निर्धारिते २० 'ओवरेषु' ७ विकेट-हान्या १७५ धावनाङ्काः विरचिताः। पाकिस्तानदलेन प्रायशः 'स्पिन'-कन्दुकपाते विश्वासः प्रकटितः तथा च १८ 'ओवरेषु' षट् 'स्पिन'-कन्दुकपातकाः नियोजिताः। क्षेत्रस्य (Pitch) साहाय्येन 'स्पिन'-कन्दुकपातकाः मध्य-चक्रेषु धावनगतिं नियन्त्रितवन्तः। पाकिस्तानस्य साइम-अयूबः २५ धावनाङ्कान् दत्वा ३ स्तोभ-ग्रहणं कृतवान् तथा च उस्मान-तारीकः चतुर्षु चक्रेषु २४ धावनाङ्कान् दत्वा एकं स्तोभं प्राप्तवान्।






-डॉ. विमलेश झा, डीएवी पब्लिक विद्यालय: बरारी भागलपुर बिहार

# शिव: एव परब्रह्म (पर्वविशेष:)

भारतीयदर्शनपरम्परायां ब्रह्मतत्त्वस्य विवेचनं परमगूढः गम्भीरः च विषयः अस्ति। वेदान्तशास्त्रे ब्रह्मशब्देन तस्य परमसत्तायाः बोधः क्रियते, या सर्वकारणकारणम्, सर्वाधारः, सर्वव्यापी, नित्यः, शुद्धः, बुद्धः, मुक्तस्वभावश्च अस्ति। उपनिषदः उद्घोषयन्ति "सत्यं ज्ञानमनन्तं ब्रह्म", "अहं ब्रह्मास्मि", "तत्त्वमसि", "सर्वं खल्विदं ब्रह्म" इति। एतेषां वाक्यानां सारः एषः यत् समस्तं विश्वं यस्मात् उत्पद्यते, यस्मिन् तिष्ठति, यस्मिन् लीयते च, तत् एव ब्रह्म इति। सनातनधर्मे ब्रह्मणः विविधा उपासनापद्धतयः सन्ति। केचन विष्णुं परब्रह्म मन्यन्ते, केचन शक्तिं, केचन सूर्यं, किन्तु शैवदर्शने शिव एव परब्रह्म इति सिद्धान्तः प्रतिपाद्यते। शिवः न केवलं देवतारूपेण पूज्यते, अपि तु तत्त्वतः एषः एव परं सत्यं, सच्चिदानन्दरूपं ब्रह्म इति प्रतिपाद्यते।

अतः अस्मिन् निबन्धे "शिवः एव परब्रह्म" इति विषयस्य शास्त्रीयं, दार्शनिकं, आगमिकं, भक्तिपरं च विवेचनं वयं करिष्यामः। वेदान्तानुसारं ब्रह्म निराकारः, निर्गुणः, अनन्तः, अव्यक्तः, अचिन्त्यः च अस्ति। तदेव परब्रह्म इत्युच्यते। परब्रह्म शब्दः तस्य परमसत्तायाः, सर्वोच्चस्य तत्त्वस्य बोधकः अस्ति, यत् सर्वेषां कारणानां कारणम् अयम् अस्ति।उपनिषत्सु कथ्यते-

"यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ति, तद् विजिज्ञासस्व, तद् ब्रह्म।" अर्थात् यत् कारणं सृष्टेः, स्थितेः, लयस्य च, तत् ब्रह्म। शैवागमे तदेव लक्षणं शिवस्य दत्तम् शिवः सृष्टिकर्ता, स्थितिकर्ता, संहारकर्ता, तिरोभावकर्ता, अनुग्रहकर्ता च अस्ति। अतः ब्रह्मलक्षणं शिवे एव पूर्णतया दृश्यते। शिवशब्दस्य तात्पर्यम् "शिव" शब्दः "कल्याणस्वरूपः", "मंगलमयः", "शुभः" इत्यर्थं बोधयति। शिवः न केवलं विनाशकर्ता, यथा सामान्यजनाः मन्यन्ते, अपि तु स एव मंगलस्य, शान्तेः, आनन्दस्य, मोक्षस्य च स्रोतः अस्ति। शैवागमे उक्तम् "शिवोऽहम्, शिवोऽहम्।" अत्र शिवः आत्मतत्त्वस्य बोधकः अस्ति। यः आत्मा, स एव शिवः; यः शिवः, स एव परब्रह्म। वेदेषु रुद्रस्य महत्त्वं प्रतिपादितम्। विशेषतः यजुर्वेदस्य श्रीरुद्राध्याये रुद्रः सर्वव्यापी, सर्वेश्वरः, सर्वाधारः च इति वर्ण्यते यथा "नमः शम्भवाय च मयोभवाय च।

नमः शंकराय च मयस्कराय च। नमः शिवाय च शिवतराय च।" अत्र शम्भुः, शंकरः, मयोभवः इत्यादयः नामानि शिवस्य ब्रह्मस्वरूपत्वं सूचयन्ति।

तैत्तिरीयसंहितायां कथ्यते- "एको हि रुद्रो न द्वितीयाय तस्थुः।" अर्थात् रुद्रः एक एव अस्ति, तस्य द्वितीयः कश्चन नास्ति। एषा उक्ति अद्वैतसिद्धान्तस्य मूलम् अस्ति। यदि रुद्रः एक एव, तर्हि स एव परब्रम्ह।

कैवल्योपनिषदि प्रतिपादितम् "स ब्रह्मा स शिवः स हरिः..."। अत्र स्पष्टं प्रतिपाद्यते यत् ब्रह्मा, विष्णुः, शिवः एते सर्वे तस्यैकस्य परतत्त्वस्य विविधाः प्रकाशाः सन्ति। किन्तु शैवदृष्ट्या शिवनाम्ना तदेव परतत्त्वं निर्दिश्यते। श्वेताश्वतरोपनिषदि कथ्यते- "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।" अत्र यः रुद्रः, स एव परं ब्रह्म, एतस्य ज्ञानात् मोक्षः भवति। शैवागमाः, शिवपुराणम्, लिङ्गपुराणम्, स्कन्दपुराणम् इत्यादिषु शिवस्य परब्रह्मत्वं विस्तारतः वर्णितम्।

शिवपुराणमध्ये उक्तम्- "शिवाद् अन्यत् परं नास्ति, शिवः सर्वपरात्परः।" अर्थात् शिवात् परं किमपि नास्ति; एषः एव सर्वोच्चः विद्यते।

लिङ्गपुराणे लिङ्गस्य ब्रह्मरूपत्वं वर्णितम् अस्ति। लिङ्गं निराकारब्रह्मणः प्रतीकः अस्ति। लिङ्गस्य आद्यन्तरहितत्वं ब्रह्मणः अनाद्यनन्तत्वस्य सूचकं भवति। परब्रह्म सच्चिदानन्दरूपम् इति वेदान्ते प्रतिपाद्यते। सत् (नित्यसत्ता), चित् (चैतन्यस्वरूपम्), आनन्दः (परमानन्दः) एते त्रयः गुणाः ब्रह्मणः लक्षणानि। शिवः "चिदानन्दरूपः शिवोऽहम्" इति महावाक्येन प्रतिपाद्यते। शिवस्य ध्यानमन्त्रे कथ्यते-

"शान्ताकारं भुजगशयनं..." (यद्यपि इयं विष्णोः स्तुतिः, तथापि शान्तस्वरूपत्वं समानम्)। शिवः समाधिस्थः, ध्यानमग्नः, कालातीतः च अस्ति। एतस्य तृतीयनेत्रं ज्ञानस्य प्रतीकः, चन्द्रः शीतलतायाः, गङ्गा पवित्रतायाः, नीलकण्ठत्वं त्यागस्य च प्रतीकानि सन्ति। एतानि सर्वाणि ब्रह्मस्वभावस्य द्योतकानि भवन्ति। अद्वैतवेदान्ते ब्रह्मैव सत्यं, जगन्मिथ्या, जीवो ब्रह्मैव नापरः इति सिद्धान्तः प्रतिपादितः। शैवदर्शने अपि "शिवोऽहम्" इति अनुभूतिरेव मोक्षः विद्यते। काश्मीरशैवदर्शने प्रतिपाद्यते यत् सम्पूर्णं जगत् शिवस्य स्पन्दः एव अस्ति। यत् चैतन्यम् अस्ति, तत् शिवः। जीवः शिवस्य आवरणयुक्तः प्रकाशः वर्तते। आवरणनिवृत्तौ जीवः स्वस्य शिवस्वरूपं अनुभवति। परब्रह्म सृष्टेः आदिकारणम्। शैवदर्शने शिवः पंचकृत्यकर्ता इति कथ्यते- सृष्टिः, स्थितिः, संहारः, तिरोभावः, अनुग्रह इति।

एतेषां पञ्चानां कृत्यानां कर्ता केवलं परब्रह्म भवितुमर्हति। अतः शिवस्य एतत् कार्यं एतस्य परब्रह्मत्वं प्रमाणयति। भक्तिमार्गे शिवोपासना मोक्षस्य साधनम् उच्यते। "ॐ नमः शिवाय" इति पञ्चाक्षरी मन्त्रः ब्रह्मविद्यायाः बीजम् इति कथ्यते।

यः श्रद्धया, भक्त्या, ध्यानपूर्वकं शिवं उपासते, स आत्मतत्त्वं अनुभवति। गीतायां श्रीकृष्णः अपि वदति-

**"भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः।**
**ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥"**

इति "यद्यपि अत्र वक्ता कृष्णः, तथापि तत्त्वतः स एव परब्रह्म। शैवदृष्ट्या तदेव शिवरूपेण बोध्यते। परब्रह्म निराकारम्, किन्तु उपासनार्थं साकाररूपेण अपि प्रकटते। शिवलिङ्गं निराकारस्य प्रतीकः, महादेवस्य मूर्तिः साकाररूपम् अस्ति। अतः शिवः निर्गुणोऽपि, सगुणोऽपि। निर्गुणरूपेण परब्रह्म, सगुणरूपेण ईश्वरः। एषा द्विविधा अवस्था तस्य पूर्णत्वं दर्शयति। यद्यपि विभिन्नसम्प्रदायाः भिन्नदेवतां परब्रह्म मन्यन्ते, तथापि शास्त्रदृष्ट्या सर्वदेवतासु एकमेव तत्त्वं प्रकाशते। "एकं सत् विप्रा बहुधा वदन्ति" इति ऋग्वेदवचनम् अस्ति।

शैवाः तदेव तत्त्वं शिवनाम्ना निर्दिशन्ति। अतः "शिव एव परब्रह्म" इति वाक्यं सम्प्रदायविशेषस्य सिद्धान्तः, किन्तु तत्त्वतः सर्वदेवतासु तदेव एकं ब्रह्म विराजते। समस्तशास्त्राणां, उपनिषदाम्, आगमानां, पुराणानां च सारः एषः यत् एकमेव परं तत्त्वं अस्ति, यत् सर्वव्यापि, सर्वाधारः, सच्चिदानन्दरूपं वर्तते। शैवदर्शने तदेव तत्त्वं शिव इति कथ्यते। शिवः न केवलं कैलासवासी देवः, न केवलं त्रिशूलधारी योगी, अपि तु स एव परब्रह्म, परमात्मा, आत्मस्वरूपं च। यदा जीवः अज्ञानावरणं त्यक्त्वा आत्मानं पश्यति, तदा स अनुभवति। "नाहं देहः, न मनः, न बुद्धिः;शिवोऽहम्, शिवोऽहम्।" इति।

अतः निष्कर्षतः वयं वक्तुं शक्नुमः- शिव एव परब्रह्म। स एव आदिः, स एव अन्तः, स एव सर्वम्।।



# बोधकथा

कश्चन वृद्धं कमपि पृष्टवान्, तस्मै किञ्चित उपदेशं ददातु। तदा तेन वृद्धेन् विचित्रं प्रश्नं पृष्टम्। "कदा पात्राणि प्रक्षालितानि वा? मनुष्यः उक्तवान्- "आम् प्रक्षालितानि"। वृद्धः पृष्टवान् किं शिक्षितम्? तदा मनुष्यः उत्तरत- तत्र ज्ञानस्य का वार्ता? वृद्धः हसित्वा उक्तवान्- पात्राणि अन्ततः अधिकं प्रक्षालितव्यानि, बहितः न्यूनानि च।

"बाह्यशुद्धेः अपेक्षया अन्तः शुद्धिः श्रेष्ठा भवति।"

डा. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्



# स्वच्छतायाः महत्त्वम्

**आदित्यः:** नमो नमः मयङ्क! कुत्र गच्छति भवान् सत्वरम्?

**मयङ्कः:** नमो नमः आदित्य! अद्य मम विद्यालये 'स्वच्छता-अभियानम्' अस्ति, तत्रैव गच्छामि।

**आदित्यः:** शोभनम्! किन्तु किं स्वच्छता केवलं सर्वकारस्य कार्यम् अस्ति?

**मयङ्कः:** न हि मित्र! स्वच्छता तु अस्माकं सर्वेषां नैतिकं कर्तव्यम् अस्ति। उक्तं च— 'स्वच्छता देवत्वस्य द्वारम्'। यत्र स्वच्छता वर्तते, तत्रैव स्वास्थ्यं सुखं च निवसतः।

**आदित्यः:** सत्यं वदति भवान्। परं पश्यतु, जनाः अद्यापि मार्गेषु अवकरं (कचरा) क्षिपन्ति। एतत् कथमपि उचितं नास्ति।

**मयङ्कः:** आम्, एषा एव महती समस्या। अस्माभिः प्रतिज्ञा करणीया यत् वयं न तु कुत्रापि अवकरं क्षेप्स्यामः, न च अन्यं क्षेप्तुं दास्यामः। 'स्वच्छं भारतं, स्वस्थं भारतम्' इति अस्माकं लक्ष्यं भवेत्।

**आदित्यः:** अस्तु! अहमपि भवता सह चलिष्यामि। आवां मिलित्वा मार्गं स्वच्छं करिष्यावः जनान् च जागरूकान् करिष्यावः।

**मयङ्कः:** अति उत्तमम्! आगच्छतु, मिलित्वा देशं स्वच्छं कुर्मः।